श्रीमत्कविकुलतिलक श्रीत्रिविक्रमपण्डिताचार्यसुत
श्रीमन्नारायणपण्डिताचार्यविरचिता

# ध्यानमाला

अनेक–जन्म–संचित–प्रभूत–पुण्य–निर्मितम् ।
शरीरमीदृशं भवेत् कुतोऽन्यथा रतिर्हरौ ॥ १ ॥

अदः प्रपद्यसाधवः प्रसादयन्ति माधवम् ।
सदागमैः सु–युक्तिभिः सुनिष्ठया च भक्तिभिः ॥ २ ॥

वयं च दैव –योगतः प्रतीकमीदृशं गताः ।
यतामहे मनो–वचः–प्रवृत्तिभिः सुवृत्तिभिः ॥ ३ ॥

अनादि–कर्म–वासना–निरंतरानु–बंधनम् ।
नृसिंह–पावके मनो निमज्ज्य भस्म–सात् कुरु ॥ ४ ॥

अशेष–कल्मष–क्षयात् ततः प्रबोधयो भवेत् ।
अथापि भक्त–वत्सलो हरिः प्रसादमृच्छति ॥ ५ ॥

सदागमैः समन्वयात् सदोदिता गुणा हरेः ।
न युक्तयो न चाऽगमाः विरोद्धुमीशते हरेः ॥ ६ ॥

हरेः प्रबोध–संभवो विरक्ति–भक्त्युपास्तिभिः ।
निजापरोक्ष्य–भागिनः सृतेरयं प्रमोचयेत् ॥ ७ ॥

इतीममर्थमंजसा मनः सदैव भावय ।
त्वमंग वागनाकुलं विचारयस्व शास्त्रतः ॥ ८ ॥

शतोत्तरा तु नाडिका सुषुम्न–रश्मि–दीपिता ।
उपासतो जनार्दनं कळेबरेऽभि–भासते ॥ ९ ॥

दिनेश–रश्मि–संचय–स्फुरत्सु–नाडिकावृता ।
यथामृतांशु–मंडली प्रदीप्ततारकावृता ॥ १० ॥

अशेष–लोक–पावनी वि–निःसृता च मूर्धनि ।
तयोर्ध्वमेव यो व्रजन्नुतामृतत्वमेति हि ॥ ११ ॥

अतीवसूक्ष्मरूपिणी तथापि शक्तितो हरेः ।
महावकाश–संयुता दुरंत–शक्तिमान् ह्यजः ॥ १२ ॥

वरोऽपि रत्न–मंडपो विभाति तत्र पेशलम् ।
अनंत–कांत–कांति–सन्मणींद्र–मालिका–स्फुरन् ॥ १३ ॥

अमंद–सौरभ–स्मित–प्रसून–दाम–पाळिभिः ।
अगत्वरोरु–कांतिभिः क्षरत्–सुधाभिरुल्लसन् ॥ १४ ॥

इहापि रत्न–निर्मितं सरो–रुहं मनोरमम् ।
सुतीव्रमच्च–सच्चदं विकस्वरं विराजते ॥ १५ ॥

वि–पाप्म–तां च दभ्र–तां परस्य वेश्म–भूत–ताम् ।
पुरस्य मध्यसंस्थ–तां मनीषिणः श्रुतौ स्फुटम् ॥ १६ ॥

उदा–हरंति यान् गुणान् तदेतदुत्तमोत्तमम् ।
दंबुजं दिवा–कर–प्रकार–दीधिति–ज्वलत् ॥ १७ ॥

अमुष्य कर्णिका–पुटे सु–दीप्त–रत्न–विष्टरम् ।
चकासतः परः पुमानधिष्ठितोऽति शोभनम् ॥ १८ ॥

असंख्य–बाल–भास्करारुण–प्रभूत तेजसम् ।
तमेतमक्षरं मनोवि–चिंतयस्व संततम् ॥ १९ ॥

जपा–प्रसून–पाटल–स्फुरत्तलांघ्रि–पंकजम् ।
तटिल्लता–लसन्नखम् सु–हारि–जंघमुत्तमम् ॥ २० ॥

समग्र–चंद्र–मंडलानु–कारि–जानु–मंडलम् ।
महेंद्र–हस्ति–हस्त–सप्रभोरु–चारु–विभ्रमम् ॥ २१ ॥

वराचित–स्मिताशन–प्रसून–कांति–वाससम् ।
विचित्र–रत्न–मेखला–कलाप–वर्य–भूषितम् ॥ २२ ॥

वलि–स्फुरत्–तनूदर–प्रभात–नाभि–मंडलम् ।
पयोब्धि–कन्यका–धरा–करावगूड मध्यमम् ॥ २३ ॥

कराळ–हार–मालय सु–दिव्य–सून–मालया ।
निरंतरोर्जित–श्रिया चकासदच्च–वक्षसम् ॥ २४ ॥

समस्त–लोक–सुंदरीमनंत–राज–रोचिषम् ।
अमंद–भासि भिभ्रतं श्रियं विशाल–वक्षसि ॥ २५ ॥

शिरोधरोल्लसन्महा–मनः–समूह–कौस्तुभम् ।
समुन्नतांस–मंडल–द्वयाभि–राममुज्वलम् ॥ २६ ॥

सु–दर्शनीयमंबुजं सुदर्शनं वरोदरम् ।
महा–दरं दर–च्छिदं गदामराति–भंग–दाम् ॥ २७ ॥

बिभर्ति–पाणि–पल्लवैरनंत–विभ्रमाकरैः ।
चतुर्भिरुत्तमोत्तमं तमांतर स्मर स्फुटम् ॥ २८ ॥

सु–पद्मराग–भंग–भा–स्फुरन्नखाळि–शोभितम् ।
सुवर्ण–रत्न–मुद्रिका–प्रभात–कोमलांगुलिम् ॥ २९ ॥

अनर्घ–दीर्घ–सद्–घृणि–प्रकाशिताखिलाशकैः।
वरांगदैरलंकृतं महाधनैः स–कंकणै ॥ ३० ॥

उदार–हार–गौर–दत्–ततिं सु–मंदहासिनम्।
विशुद्ध–विद्रुमाधर–द्विज–च्छदाति–पेशलम् ॥ ३१ ॥

सु–हारि–हेम–कुंडल–प्रभात–गंड–मंडलम्।
नवीन–वारिजोदर–च्छदायतंबकद्वयम् ॥ ३२ ॥

दयार्द्रया दृशाऽनिशं भवाब्धि–साध्वसोत्–कृता।
सु–दिव्ययाऽमृत–स्रुता निजेषु दोग्धि याऽमृतम् ॥ ३३ ॥

अराळ–नील–कुंतळावली–विराजि–सन्मुखम्।
अनंत–रत्न–चित्रितोन्मिषत्–किरीट–मंडितम् ॥ ३४ ॥

विधूत–दो ?मुत्तमं चिति–प्रमोद–रूपिणम्।
अधीशितारमंजसा भजस्व चित्त सच्चिते ॥ ३५ ॥

श्रियोदयद्–दिवाकर–व्रज–श्रिया नि ?वितम्।
ह्रिया कटाक्ष–वीक्षण–स्फुरन्मुखारविंदया ॥ ३६ ॥

प्रकाशमान–कुंडल–द्वय–प्रभात–गंडया।
परार्घ्य–रत्न–मालिका–गणोज्वलत्–किरीटया ॥ ३७ ॥

अराळ–नील–कुंतळ–व्रजोडु–राज–वक्त्रया।
स्मितांबुज–च्छदायत–प्रभूत–कांति–नेत्रया ॥ ३८ ॥

विपाक–ताम्र–तुंडिका–सुपाटलाधर–श्रिया।
वलक्ष–कुंद–कुड्मल–प्रकाश–कांत–दंतया ॥ ३९ ॥

गळ–स्फुरन्निरंतर–प्रभाळि–रत्न–वेषया।

प्रवेक–वेष–भूषित–प्रवेष्ट–शोभि–पद्मया ॥ ४० ॥

सहार–मालिका–तती–विराजि–चारु–वक्षसा ।
सु–वृत्त–तुंग–पीवर–ज्वलत्–पयोधर–स्फुरा ॥ ४१ ॥

तनूदर–स्फुटीभवद्–वलि–त्रयाभिरामया ।
सुवर्ण–मेखलोपरि स्फुरत्–पिशंग–वाससा ॥ ४२ ॥

मनोज्ञ–हारि–नूपुर–प्रभासितांघ्रि–पद्मया ।
उदार–रत्न–दर्पण–प्रभा–नखावलि–श्रिया ॥ ४३ ॥

अनंत–नूत्न–भास्कर–प्रभा–प्रभासमानया ।
गुणाळि–भाजनीभवत्–प्रमोद–चित्–स्वरूपया ॥ ४४ ॥

तथैव चारु–लीलया हरिन्मणि–श्रिया भुवा ।
विचित्र–वाससा स्मित–श्रियाऽनुरंजिताशया ॥ ४५ ॥

अथापि सर्व–साक्षिणि क्षणे–क्षणेंबुजेक्ष्शणे ।
प्रवृत्ति–जातमंजसा हरौ मनः समर्पय ॥ ४६ ॥

पुरोपचेयमात्मनः पुरा प्रसाधनं स्मर ।
ततोपचेय सत्–क्रिया अमुष्य बुद्धि–वर्धिनीः ॥ ४७ ॥

उपद्रवे विपत्तिभिः स्मराघ–नाशनं परात् ।
अशेष–संपदां परं पदं मुदाभिराधय । । ४८ ॥

सुषुप्ति–संध्य–जागर–क्रिया–फलैर्हरिं पुरः ।
परं सदा समुशिन्मनोऽर्चयाभिरादय ॥ ४९ ॥

****